प्रभावत्याम् ॥ "इह हि संप्रति दिगन्तमाच्छादयता तिमिरपटलेन । घटितमिवाञ्जनपुञ्जैः पूरितमिव मृगमदक्षोदैः । ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भुवनम्"॥ अत्राञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयो व्याप्तत्वं नोपात्तं यथा वा ॥ "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः" ॥ अत्र तमसोलेपस्य व्यापनरूपोविषयोनोपात्तः अञ्जनवर्षणस्य तमःसंपातः, अनयोरुत्प्रेक्षानिमित्तञ्च तमसोऽतिबहुलत्वं धारावर्षणाधःसंयोगश्च यथासंख्यम् । केचित्तु अलेपनकर्तृभूतमपि तमोलेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनञ्च निमित्तम् एवं नभोपि वर्षणक्रियाकर्तृत्वेनेत्याहुः । "अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत्" तत्र सापह्नवोत्प्रेक्षा यथा । "अश्रुच्छलेन सुदृशोहुतपावकधूमकलुषाक्ष्याः । अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव" । श्लेषहेतुगा यथा । मुक्तोत्करः सङ्कटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः । जानीमहेऽस्याः कमनीयकम्बुग्रीवाधिवासाद्गुणवत्त्वमाप" । अत्र गुणवत्त्वे श्लेषः कम्बुग्रीवाधिवासादिवेति हेतूत्प्रेक्षाया हेतुः । अत्र जानीमहे इत्युत्प्रेक्षावाचकम् एवम् 'मन्ये शङ्के ध्रुवं प्रायोनूनमित्येवमादयः" । क्वचिदुपमोपक्रमोत्प्रेक्षा यथा । 'पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराजीः । वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवालाभाः"।इत्यत्राभाशब्दस्योपमावाचकत्वादुपक्रमे उपमा पर्य्यवसाने तु जलधितीरे शैवालस्थितेः संभवानुपपत्तेः संभावनोत्थानमित्युत्प्रेक्षा एवं विरहवर्णने । "केयूरायितमङ्गदैरित्यत्र" 'विकासिनीलोत्पलभिन्नकर्णे मृगायताक्ष्याः कुटिलः कटाक्षः" इत्यादौ च ज्ञेयम् । भ्रान्तिमदलङ्कारे "मुग्धा दुग्धधियेत्यादौ भ्रान्तानां वल्लवादीनां विषयस्य चन्द्रिकादेर्ज्ञानं नास्ति तदुपनिबन्धनस्य कविनैव कृतत्वात् । इह तु संभावनाकर्त्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः । सन्देहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः इह तूत्कटा संभाव्यभूतैका कोटिः । अतिशयोक्तौ विषयिणः प्रतीतस्य पर्य्यवसानादसत्यता प्रतीयते इह तु प्रतीतिकालएवेति भेदः । "रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु । पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण" इत्यत्र तर्वादौ तिमिराक्रान्ततारञ्जनादिरूपेण सन्दिह्यतइति सन्देहालङ्कारइति केचिदाहुः । तन्न एकविषये समानबलतयानेककोटिस्फुरणस्यैव सन्देहत्वात् इह तु तर्वादिव्याप्तेः प्रतिसम्बन्धिभेदव्यापनादेर्निगरणेन रञ्जनादेः स्फुरणञ्च । अन्ये त्वनिर्द्धारणरूपविच्छित्त्याश्रयत्वेनैककोट्यधिकोऽपि भिन्नोऽयं सन्देहप्रकारइतिवदन्ति तदप्ययुक्तं निगीर्णस्वरूपस्यान्यतादात्म्यप्रतीतिर्हि सम्भावना तस्याश्चात्र स्फुटतया सद्भावात् नुशब्देन चेवशब्दवत्तस्या द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता अलमदृष्टसन्देहप्रकारकल्पनया । "यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते तदाचष्टे लोकः शशकइति नो मां प्रति तथा । अहन्त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणीकटाक्षोल्कापातव्रणकिणकलङ्काङ्किततनुम्" इत्यत्र मन्येशब्दप्रयोगेऽपि उक्तरूपायाः सम्भावनाया अप्रतीतेर्वितर्कमात्रम्" नासावपह्नवोत्प्रेक्षा ।

२९ उदात्तम् "लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्"सा०द०। "अधः कृताम्भोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम् । ज्योत्स्नानिपातात् क्षरतां पयोभिः केलीवनं वृद्धिमुरीकरोति" । "नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा । अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते" ।

३० उपमा "साम्यं वाच्यमवैधर्म्यं वाक्यैक्ये उपमा द्वयोः"सा०द०। रूपकादिषु साम्यस्य व्यङ्गत्वं व्यतिरेके च वैधर्म्यस्याप्युक्तिः उपमेयोपमायां वाक्यद्वयम् अनन्वये च एकस्यैव साम्योक्तिरित्यस्याभेदः । 'सा पूर्णा यदि सामान्यधर्म्म औपम्यवाचि च । उपमेयं चोपमानं भवेद्वाच्यम्" सा उपमा साधारणोधर्म्मो द्वयोः सादृश्यहेतुर्गुणक्रियामनोज्ञत्वादि, औपम्यवाचकमिवादि, उपमेयं मुखादि,उपमानं चन्द्रादि। "इयं पुनः । श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि । आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः" । यथेवादयः शब्दा उपमानान्तरप्रयुक्ततुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसम्बन्धं बोधयन्तीति तत्सद्भावे श्रौती उपमा । एवं "तत्र तस्येवेत्यनेन" इवार्थे विहितस्य वतेरुपादाने । तुल्यादयस्तु "कमलेन तुल्यं मुखमित्यादौ"उपमेय एव । "कमलं मुखस्य तुल्य"मित्यादावुपमान एव "कमलं मुखञ्च तुल्य"मित्यादावुभयत्रापि विश्रामन्तीति तत्सद्भावे आर्थी । एवं "तेन तुल्यमित्यादिना" तुल्यार्थे विहितस्य वतेरुपादाने। द्वे श्रौती आर्थी च । उदाहरणम् "सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ। हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले! ॥"अत्र क्रमेण त्रिविधा श्रौती। "मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः । चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः" ॥ "अत्र क्रमेण त्रिविधा आर्थी